# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (०४)

२३.१०.२०१२

# ३०८. न षट्स्वस्रादिभ्यः (४.१.१०)

- पदद्वयम् । न, षट्-स्वस्रादिभ्यः ।
- 'अजाद्यतष्टाप्' (४.१.४) इत्यतः 'टाप्' इति, 'ऋन्नेभ्यो ङीप्' इत्यतः 'ङीप्' इति च अनुवर्तते ।
- षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्-टापौ न स्तः ।
- स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा ।
- याता मातेति सप्तैते स्वस्रादय उदाहृताः ॥
- पञ्च ।
- चतस्रः ।

- पञ्च इत्यत्र नलोपे कृतेऽपि ‘ष्णान्ता षट्’ (१.१.२४) इति षट्संज्ञां प्रति ‘नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति’ (८.२.२) इति नलोपस्य असिद्धत्वाद् ‘न षट्स्वस्रादिभ्यः’ (४.१.१०) इति न टाप् ।
- पञ्चन् – नकारान्तत्वात् ङीप् प्राप्नोति । नकारान्तसंख्यात्वात् षट्संज्ञा । तस्मात् ङीब्निषेधः ।
- पञ्चन् जस्
- पञ्चन् (‘षड्भ्यो लुक्’ –७.१.२२)
- पञ्च (‘नलोपः प्रातिपदिकान्तस्य’ – ८.२.७)
- इदानीम् अकारान्तत्वात् टाप् प्राप्नोति । नान्तत्वाभावेन षट्संज्ञायाः अप्रवृत्तौ ‘न षट्स्वस्रादिभ्यः’ इति निषेधः न स्यादिति आशङ्का ।

# ४५९. मनः (४.१.११)

- एकपदात्मकं सूत्रम् ।
- 'ऋन्नेभ्यो ङीप्' (४.१.५) इत्यतः 'ङीप्' इति, 'न षट्स्वस्रादिभ्यः' (४.१.१०) इत्यतः 'नः' इति च अनुवर्तते ।
- मन्नन्तात् न ङीप् ।
- सीमा, सीमानौ ।
- सीमेति ।

# ४६०. अनो बहुव्रीहेः (४.१.१२)

- पदद्वयम् । अनः, बहुव्रीहेः ।
- 'ऋन्नेभ्यो ङीप्' (४.१.५) इत्यतः 'ङीप्' इति, 'न षट्स्वस्रादिभ्यः' (४.१.१०) इत्यतः 'नः' इति च अनुवर्तते ।
- अन्नन्ताद् बहुव्रीहेः न ङीप् ।
- बहुयज्वा, बहुयज्वानौ ।

# ४६१. डाबुभाभ्यामन्यतरस्याम् (४.१.१३)

- पदत्रयम् । डाप्, उभाभ्याम्, अन्यतरस्याम् ।
- सूत्रद्वयोपात्ताभ्यां डाब् वा स्यात् ।
- सीमा, सीमे, सीमानौ ।
- दामा, दामे, दामानौ ।
- ‘न पुंसि दाम’ इत्यमरः ।
- बहुयज्वा, बहुयज्वे, बहुयज्वानौ ।

# ४६२. अन उपधालोपिनोऽन्यतरस्याम् (४.१.२८)

- पदत्रयम् । अनः, उपधालोपिनः, अन्यतरस्याम् ।
- ‘बहुव्रीहेरूधसो ङीष्’ (४.१.२५) इत्यतः ‘बहुव्रीहेः’ इति, ‘संख्याव्ययादेर्ङीप्’ (४.१.२६) इत्यतः ‘ङीप्’ इति च अनुवर्तते ।
- अन्नन्ताद् बहुव्रीहेः उपधालोपिनः वा ङीप् स्यात् ।
- पक्षे डाब्ङीब्निषेधौ ।
- बहुराज्ञी, बहुराजा ।
- बहुराज्ञ्यौ, बहुराजे, बहुराजानौ ।

# ४६३. प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः (७.३.४४)

- सप्त पदानि । प्रत्ययस्थात्, कात्, पूर्वस्य, अतः, इत्, आपि, असुपः ।
- प्रत्ययस्थात् ककारात् पूर्वस्य अकारस्य इकारः स्याद् आपि परे, स आप् सुपः परो न चेत् ।
- सर्विका ।
- सर्विकेति ।
- सर्व (टाप्) आ (‘अजाद्यतष्टाप्’ – ४.१.४)
- सर्वा (‘अकः सवर्णे दीर्घः’ – ६.१.१०१)
- सर्व् अक् आ (‘अव्ययसर्वनाम्नामकच् प्राक्टेः’ )
- सर्व् इक् आ (‘प्रत्ययस्थात्..’ – ७.३.४४)

- कारिका ।
- कारिकेति ।

- अतः किम् – नौका ।

- प्रत्ययस्थात् किम् – शक्नोतीति शका ।

- असुपः किम् – बहुपरिव्राजका नगरी ।
- बहुपरिव्राजकेति ।

काात् किम् – नन्दना ।

पूर्वस्य किम् – परस्य मा भूत् । कटुका ।

कटुकेति ।

अत इति तपरः किम् – राका ।

राका इति ।

आपि किम् – कारकः ।